॥ अथायोध्यामाहात्म्यंप्रारभ्यते ॥

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०मा०
१

श्रीगणेशायनमः॥वंदेहंरामचंद्रस्यपादौप्रणतरक्षकौ॥सीतायाश्चपुनःपादौसर्वसिद्धिविधायकौ॥१॥रामंरामानुजंसीतांभरतंभ
रतानुजं॥सुग्रीवंवायुसूनुंचप्रणमामिपुनःपुनः॥२॥पार्वत्युवाच॥साधुभागवतश्रेष्ठसाधुमार्गप्रबोधक॥त्वयातुयत्सरिज्ञातंतन्न
जानातिकश्चन॥३॥त्वत्तःश्रुत्वामहाभागनानातीर्थकथाःशुभाः॥सांप्रतंश्रोतुमिच्छामिसरहस्यंसनातनं॥४॥अयोध्यायामहापुर्या
महिमानंगुणोज्वलं॥कीदृशीसासदायोध्याऽयोध्याविष्णुप्रियापुरी॥५॥आद्यासागीयतेवेदैःपुरीणांमुक्तिदायिका॥संस्थानंकीदृशं
त्वस्याःतस्यांकेचमहीभुजः॥६॥कानितीर्थानिपुण्यानिमाहात्म्यंतेषुकीदृशं॥अयोध्यासेवनान्नृणांफलंस्यात्कीदृशं॥७॥उत्प
त्तिश्चकथंजाताकानद्यःकेचसंगमाः॥तत्रस्नानेनकिंपुण्यंदानेनचमहामते॥८॥तत्सर्वंश्रोतुमिच्छामित्वत्तःशिवगुणाधिकान्॥
एतत्सर्वंक्रमेणवब्रूहिसर्वंयथार्थतः॥९॥श्रीमहादेवउवाच॥यस्याःपश्चिमतोनदप्रवहतिब्रह्मात्मजोघर्घरःसामीप्यंत्रजहातियत्रश
रयूःपुण्यानदीसर्वदा॥विद्यायत्रमहाधिकागिरिस्फुतेस्थानंचविष्णोर्हरेःसा योध्याविमलापुरीपुरिवरास्याद्वःसदानंददा॥१०॥न
मामिपरमानंदरामंराजीवलोचनं॥अतसीकुसुमश्यामंरावणांतकमच्युतं॥११॥शृणुदेविसर्वंसेत्वमयोध्यानगरंशुभं॥सर्वती
र्थाधिकंपुण्यंश्रुत्वापापात्तिगोभवेत्॥१२॥सरय्वाद्दौतुसमुत्पन्नात्रैलोक्येवविराजते॥नगरीनिर्मितापूर्वंमीश्वरेणमहात्मना॥१३॥
तामुत्पत्तिंप्रवक्ष्यामिशृणुष्व त्वंमनोहरे॥स्वायंभुवोमनुर्नामब्रह्मणःप्रथमःसुतः॥१४॥प्रजानांपालकोराजासत्यलोकं [illegible] ॥१

अ०१
१

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

ब्रह्माणं च नमस्कृत्य विनयावनतः स्थितः ॥१५॥ तं दृष्ट्वा राजशार्दूलं विनयेन विराजितं ॥ प्रहस्य ब्रह्मा प्रोवाच राजानं च कृतांजलिं ॥१६॥ ब्र
ह्मोवाच ॥ किमर्थं त्वं गतो वत्स किं कार्यं वद मेऽग्रतः ॥ शीघ्रं कथय मे सर्वमात्मनो गमनादिकं ॥१७॥ मनुरुवाच ॥ सृष्ट्यर्थं ज्ञापितो हं वै त
वाज्ञा प्रतिपालिता ॥ सृष्ट्यादौ वसते स्तात स्थानं देहि मनोरमम् ॥१८॥ इति तस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ जगाम विष्णुलोकं
च मनुना सह पार्थिव ॥१९॥ वैकुंठमिति यल्लोके वेदप्रोक्तं सुरास्करे: ॥ चतुरस्रं चतुर्द्वारं वरप्राकारतोरणं ॥२०॥ यत्र वै माणिकाप्रो
क्ता ललनायूथपस्ततः ॥ गायंति सामगा नित्यं गंधर्वाप्सरसस्तथा ॥२१॥ सर्वे चतुर्भुजाः प्रोक्ता मणिकुंडलशोभिताः ॥ चंडप्रचंडौ
प्राग्द्वारे याम्ये भद्रसुभद्रकौ ॥२२॥ जयविजयौ वारुण्यां सौम्ये धातृविधातरौ ॥ तन्मध्ये तु महापीठं नानारत्नोपशोभितं ॥२३॥ तस्यो
परि महाराजं सर्वलोकनमस्कृतं ॥ वासुदेवं जगन्नाथं ब्रह्मा लोकपितामहः ॥२४॥ उवाच प्रांजलिर्ब्रह्मा वाचा मधुरया गिरा ॥ ब्रह्मोवा
च ॥ देवाधिदेव देवेश भक्तानुग्रहकारक ॥२५॥ नगरे वसतिं देहि मन्वर्थं देवसत्तमः ॥ इति तस्य वचः श्रुत्वा वासुदेवो जनार्दनः ॥२६॥
वैकुंठमध्ये यत्प्रोक्तमयोध्यानगरं शुभं ॥ अनेकाश्चर्यसंयुक्तं सर्वसंपत्तिदं शुभं ॥२७॥ दत्वा च मनुहस्ते च ब्रह्मणा चानुमोदितः ॥
अथानुज्ञापितो ब्रह्मा मनुः स्वायंभुवश्च सः ॥२८॥ आगतौ मर्त्यलोके च विश्वकर्मसमन्वितौ ॥ वशिष्ठं प्रेषयामास पश्चात्तत्र जनार्दनः

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०मा० २९॥ सचारुक्ष्मा यत्र दृष्टा अयोध्या तत्र निर्मिता॥ इति विष्णोरादेशाच्च निर्मिता सा महापुरी॥३०॥ अयोध्या नगरी रम्या रत्नमंडपशो अ०१
२ भिता॥ अनेकरत्नसंकीर्णज्वलनार्कसमप्रभा॥३१॥ आवासैरुत्तमैर्युक्ता दिव्यप्राकारतोरणा॥ स्वर्णदुर्गसंयुक्ता दिव्यप्राकारतो
रणा॥३२॥ स्वर्णदुर्गसंयुक्ता दिव्यप्राकारतोरणा॥ परिखामारकूटा च हर्म्यैः स्वर्णैर्विराजिता॥३३॥ प्राकारध्वजनादालपरिखा
रत्नतोरणा॥ अनेकग्रहसंयुक्ता रचिता विश्वकर्मणा॥३४॥ स्वर्णरौप्यायसैः शृंगैः संकुला सर्वतो गृहैः॥ नीलस्फटिकवैदूर्यमुक्ताम
रकततोरणैः॥३५॥ कृतहर्म्यस्थली रम्या सर्वदेवनमस्कृता॥ सभाचत्वाररथ्याभिः सर्वतोभवनैर्युता॥३६॥ अयोध्या परमामेध्या
पुरी दुःकृतिदुर्लभा॥ कस्य सेव्या च नो भव्या यस्याः साक्षाद्धरिः स्वयं॥३७॥ शरयूतीरमासाद्य दिव्या परमशोभना॥ अमरावतीति
साप्रायश्रिता बहुतपोधनैः॥३८॥ हस्त्यश्वरथपत्त्याढ्या विभूत्या च विराजिता॥ प्राकाराट्टप्रतोलीभिस्तोरणैः कांचनैः शुभैः॥३९॥
स्वरूपवेषैः सर्वत्र सुविभक्ता चतुःपथा॥ अनेकभूमिप्रासादा बहुभांडस्कविक्रया॥४०॥ पद्मोत्पलप्रभा नित्यं वापीभिरुपशोभिता॥
देवतायतनैर्दिव्यैर्वेदघोषैश्च शोभिता॥४१॥ वीणावेणुमृदंगादिशब्दैरुत्कृष्टकैर्युता॥ शालैस्तालैर्नारिकेलैः यत्र सा फलकैस्तथा॥४२ २
तथैवाम्र कपित्थाद्यैरशोकैरुपशोभिता॥ आरामैर्विविधैर्युक्ता सर्वतःफलपादपैः॥४३॥ मालतीजातिबकुलापाटलानागचं
पकैः॥ करवीरैः कर्णिकारैः केतकीभिरलंकृता॥४४॥ निंबूजंबीरकदलीमातुलिंगमहाफलैः॥ लसच्चंदनगंधाद्यैर्नागरैरुपशोभिता॥४५

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

देवतुल्यप्रभायुक्तैर्नृपपुत्रैश्च संयुता॥ सुरूपाभिर्वरस्त्रीभिर्देवस्त्रीभिरिवावृता॥४६॥ श्रेष्ठैः सत्कविभिर्युक्ता बृहस्पतिसमैर्द्विजैः॥ वणि
ग्जनैस्तथा पौरैः कल्पवृक्षैरिवावृता॥४७॥ यस्यां याता महीपालाः सूर्यवंशसमुद्भवाः॥ इक्ष्वाकुप्रमुखाः सर्वे प्रजापालनतत्पराः॥४८॥ अश्वै
रुच्चैःश्रवःप्रख्यैर्हस्तिभिर्दिग्गजैरिव॥ इति नानाविधैर्भावैरयोध्येंद्रपुरीसमा॥५०॥ शरयूनामतटिनी मानसात्प्रभवोत्तमाः॥ पश्चिमे उत्त
रे पुर्याः पूर्वस्यां दिशि सर्वदा॥ पुण्यवृद्धिकरी सा च घर्घरोत्तमसंगमा॥ मुनीश्वराश्रिततटा जागर्ति जगदुत्थिता॥५१॥ गंगा च सरयूश्चैव ब्र
ह्मद्रवइतीर्यते॥ तस्माद्धिमपुण्यतमे नद्यौ देव नमस्कृते॥५२॥ एतयोः स्नानमात्रेण ब्रह्महत्या व्यपोहति॥ अहो पुण्यतमा भूमिरयोध्या परि
कीर्तिता॥५३॥ श्रूयते महिमा यस्या मनो दत्त्वा च पार्वती॥ अकारो वासुदेवः स्यादिकारस्तु प्रजापतिः॥ उकारो रुद्ररूपस्तु तां ध्यायंति मु
नीश्वराः॥ सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः॥५५॥ नयोध्या सर्वतो यस्मात्तामयोध्यां ततो विदुः॥ विष्णोः सुदर्शने चक्रे स्थिता पुण्य
करी सदा॥५६॥ केन वर्णयितुं शक्या महिमास्याः सुबुद्धिना॥ यत्र साक्षात्स्वयं देवो विष्णुर्वसति सादरः॥५७॥ सहस्रधारामारभ्य योज
नं पूर्वतो दिशि॥ पश्चिमे च तथा देवि योजनं समतोवधिः॥५८॥ दक्षिणोत्तरभागे तु शरयूतमसावधिः॥ एतत्क्षेत्रस्य संस्थानं हरेरंतर्गृहं
स्मृतं॥५९॥ मत्स्याकृतिरियं भद्रे पुरी विष्णोरुदीरिता॥ पश्चिमे मत्स्यमूर्द्धा तु गोप्रताराश्रितः प्रिये॥६०॥ पूर्वतः पुच्छभागे हि दक्षिणो
त्तरमध्यतः॥ एतत्क्षेत्रस्य संस्थानं मया स्कंदरिवर्णितम्॥६१॥
इति रुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामहात्म्ये प्रथमोध्या

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०मा० यः॥१॥ पार्वत्युवाच॥ किंफलंगमनेतत्र किंफलंदर्शने कृते॥ कानितीर्थानि तत्रैव कोदेवस्तत्र वदस्वमे॥१॥ श्रीशंकर उवाच॥ य अ०२
२ दामतिंप्रकुरुते अयोध्यागमनंप्रति॥ तदानरकनिर्मुक्ता गायंति पितरोदिवि॥२॥ यावत्पदानि रामस्य मार्गे गच्छति मानुषः॥ प
देपदेश्वमेधस्य यज्ञस्य लभते फलं॥३॥ यात्रांनिर्गच्छमानस्य यःप्रेरयति चापरान्॥ सतुपापान्निवृत्तोवै लभतेवांछितंफलम्॥४॥
अयोध्यांगच्छमानस्य योददातिप्रतिश्रियं॥ पुत्रपौत्रसमायुक्ता क्रीडंतेनंदनेवने॥५॥ तथैवमधुरांवाणीं क्रीडंचैत्ररथांतरे॥ अध्वनि
श्रांतदेहस्यवाहनंयःप्रयच्छति॥६॥ हंसयुक्तविमानेन ब्रह्मलोकंसगच्छति॥ यात्रायांगच्छमानस्य मध्यान्हेक्षुत्पिपासिनः॥७॥ अ
न्नंददाति योभक्त्या शृणु यल्लभते फलं॥ गयाश्राद्धेन यत्पुण्यं लभते मानवोभुवि॥८॥ प्रयागेवपनेनैव यत्पुण्यंलभतेभुवि॥ अन्नदा
नेनतत्सर्वं पितॄणांतृप्तिमक्षयां॥९॥ उपानहौचयोदद्याद्योध्यांपरिगच्छतां॥ रामप्रसादात्पुरुषोगजस्कंधेनगच्छति॥१०॥ विघ्नमा
चरते यस्तु अयोध्यांपरिगच्छतां॥ नरकेमज्जते मूढ कल्पमात्रंतुरौरवे॥११॥ मार्गस्थितस्ययोधान्यंप्रयच्छतिकमंडलुं॥ प्रपादा
नसहस्रस्य फलंप्राप्नोति मानवः॥१२॥ यात्रार्थंगच्छमानस्य पादाभ्यंगंकरोति यः॥ अथप्रक्षालयेत्पादौ सर्वान्कामानवाप्नुयात्॥
१३॥ कथांशृणोति योविष्णोर्गीतंवापरिगच्छति॥ अन्नंददाति मनुजः तस्मात्धन्यतरो न हि॥१४॥ अयोध्यादृश्यमानायां दृष्टोरामाचसुं २
दरि॥ वाहनंसपरित्यज्य मूकवत्धरणीगतः॥१५॥ पंचसूनाकृतंपापं तथामार्गकृतंचयत्॥ कृमिकीटपतंगाश्च निहतापथिगच्छतां॥१६

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

परान्नं परपानीयं स्पृशेद्वै येन केन चित्॥ तत्सर्वं नाशमायाति अयोध्यादर्शने कृते॥१७॥ अयोध्यादर्शनं यस्तु करोति मनुजो यदि॥ स सज्ज
न्मकृतं पापं नश्यते नात्र संशयः॥१८॥ पठेन्नामसहस्रं तु स्तवराजमथापि वा॥ गजेंद्रमोक्षणं चापि गच्छन् गच्छन् शनैः शनैः॥१९॥ पठते म
नुजो नित्यं अयोध्यागमनं प्रति॥ गायमानो भगवतः प्रादुर्भावकथाः शुभाः॥२०॥ अथवा पठते नित्यं रामनाम सहस्रकं॥ पठते नाममात्रं तु
मुच्यते महतो भयात्॥२१॥ अयोध्या दृश्यमाना या दंडवत् प्रणतः सुधीः॥ सर्वपापविशुद्धात्मा याति विष्णोः परं पदं॥२२॥ सर्वविघ्नविनाश
नं रामं राजीवलोचनं॥ नीलोत्पलदलश्यामं पीतकौशेयवाससं॥२३॥ दंडवत् प्रणमेत् भक्त्या हर्षसंयुक्तमानसः॥ बालभावे कृतं पापं कौ
मारे यौवने तथा॥२४॥ तत्सर्वं नाशमायाति अयोध्यादर्शने कृते॥ रामदर्शनमाहात्म्यं पुण्यसंख्या न विद्यते॥२५॥ दर्शनाद्रामदेवस्य पा
पं सर्वं लयं व्रजेत्॥ पुनः शृणु महाभागे सरयूतीर्थमुत्तमं॥२६॥ यस्या दर्शनमात्रेण सर्वपापैः प्रमुच्यते॥ दुरितौघक्षयकरमं मंगलविना
शनम्॥२७॥ सर्वकामप्रदं नृणां प्रणमेत्सरयूजलम्॥ महापापक्षयकरं दुष्टानां च गतिप्रदं॥२८॥ सर्वपुण्यवशात्प्राप्तं स्कंदं दर्शरथूज
लम्॥ पार्वत्युवाच॥ तीर्थे विधिं च पृच्छामि यथोक्तं फलमश्नुते॥२९॥ स्नानदानान्नरो याति विष्णुलोके वसेत् ध्रुवम्॥ श्रीशंकर उवाच
॥ अनेन विधिना देवि शृणुष्वाद्यं यथातथम्॥३०॥ अहं ते कथयिष्यामि यदृषीणां परायणं॥ तदेकाग्रमना देवि शृणु तीर्थेषु यत्फलम्॥
३१॥ यस्य हस्तौ च पादौ च जिह्वा यस्य सुसंयुता॥ विद्या यशश्च कीर्तिश्च स तीर्थफलमश्नुते॥३२॥ अकामुको निरालंबः स्वल्पाहारो जितेंद्रि

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०मा० यः॥विमुक्तःसर्वदोषेभ्यःसतीर्थफलमश्नुते॥३३॥प्रतिग्रहनिवृत्तश्चसंतुष्टोयेनकेनचित्॥अहंकारनिवृत्तश्चसतीर्थफलमश्नुते॥३४॥ अ०२
४ अक्रोधनश्चदेवेशिसत्यवादीदृढव्रतः॥आत्मोपमश्चभूतेषुसंतुष्टोयेनकेनचित्॥३५॥ऋषिभिःक्रतवःप्रोक्ताःवेदेष्वेवयथाक्रमम्॥
फलंचैवयथाबुद्धिप्रेत्यचेहचसर्वशः॥३६॥तेनशक्यादरिद्रेणयज्ञाःकर्त्तुंमहीतले॥बहूपकरणायज्ञा नानासंभारविस्तराः॥३७॥प्रा
प्यंतेपार्थिवैरेतैःसमृद्धैर्वानरैःक्वचित्॥नार्थन्यूनैरवगुणैर्नरैकैःपथिसंस्थितैः॥३८॥योदरिद्रैरपिविधिःशक्यःप्राप्तुंचसुंदरि॥तुल्योयज्ञ
फलैःपुण्यैस्तन्निबोधमहेश्वरि॥३९॥ऋषीणांपरमंगुह्यंदेवानामपिदुर्लभम्॥तीर्थाभिगमनंचैवयज्ञैरपिविशिष्यते॥४०॥अनुपोष्य
त्रिरात्रंचतीर्थान्यत्यनियम्यच॥अदत्वाकांचनंगाश्चदरिद्रोनामजायते॥४१॥अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः॥सतत्फल
मवाप्नोतितीर्थाभिगमनेनयत्॥४२॥नृलोकेदेवलोकेचतीर्थंत्रैलोक्यविश्रुतम्॥अयोध्यानामविख्यातंसर्वदेवनमस्कृतम्॥४३॥दश
कोटिसहस्राणिदशकोटिशतानिच॥एतानिसर्वतीर्थानित्रिसंध्यानिवसंतिच॥४४॥आदित्यावसवोरुद्राःसाध्याश्चैवमरुद्गणाः॥
गंधर्वाप्सरसश्चैवनित्यंसंनिहितास्तथा॥४५॥यक्षदेवास्तपस्तप्त्वादेवाब्रह्मर्षयस्तथा॥दिव्यान्योगान्महादेविपुण्येनमहतान्वि
ताः॥४६॥अन्यदेशेस्थितोयस्तुअयोध्यांमनसास्मरेत्॥नश्यंतिसर्वपापानिनाकपृष्ठेचपूज्यते॥४७॥तस्मिंस्तीर्थेतुदेवेशिनित्यमेवपि
तामहः॥उवासपरमप्रीतोदेवदानवसंयुतः॥४८॥अयोध्यायांमहादेविदेवाःशक्रपुरोगमाः॥सिद्धिंसमभिसंप्राप्ताःपुण्येनमहतान्विताः ४

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

तत्राभिषेकं यः कुर्यात् पितृदेवार्चने रतः॥ अश्वमेधाद्दशगुणं प्रवदंति मनीषिणः॥५०॥ अप्येकं भोजयेद्विप्रं सरयूतीरमाश्रितः॥ तेना
सौ कर्मणा देवि प्रत्यग्देहे प्रमोदते॥५१॥ फलेन शाकमूलाभ्यां येन केन वर्तते स्वयं॥ तद्दद्याद्ब्राह्मणाय श्रद्धावाननसूयकः॥५२॥ तेनैव प्रा
प्नुयात्स्वर्गे हयमेधफलं नृणां॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा इतरे जनाः॥५३॥ न वियोनिं व्रजंत्येते स्नातास्तीर्थे शुभार्थिनः॥ चैत्रे मासे
च संप्राप्ते नवमीदिनमाश्रितं॥५४॥ फलं तत्राक्षयं देवि भवतीत्यनुशुश्रुमः॥ सायं प्रातः स्मरेद्यस्तु अयोध्यां च कृतांजलिः॥५५॥ उपस्पृष्टा
नि तीर्थानि अयोध्यायाश्च भामिनि॥ विष्णोः पादमवंतिकां गुणवतीं मध्ये च कांचीपुरीं नाभौ द्वारवतीं पठंति हृदये मायापुरीं योगिनः॥
ग्रीवामूलमुदाहरंति मथुरां नासाग्रवाराणसीमेतद्ब्रह्मपदं वदंति मुनयो योऽयोध्यापुरीमस्तकम्॥५७॥ जन्मप्रभृति यत्पापं स्त्रिया वा पुरुष
स्य वा॥५८॥ अयोध्यास्नानमात्रेण सर्वमेव प्रणश्यति॥ यथा सुराणां सर्वेषामादिश्च मधुसूदनः॥५९॥ तथैव सर्वतीर्थानि त्वयोध्या आदि
रुच्यते॥ प्राप्य द्वादशरात्राणि अयोध्यां नियतः शुचिः॥६०॥ कृत्स्नं सर्वानवाप्नोति स्वर्गलोकं स गच्छति॥ चतुर्वर्षशतं पूर्णमग्निहोत्रमुपा
सते॥६१॥ अयोध्यां वसते रात्रिं फलं कोटिगुणं स्मृतम्॥ अयोध्या दुःकरं गंतुमयोध्या दुःकरं तपः॥६२॥ अयोध्या दुःकरं दानं वासश्चैव सु
दुष्करम्॥ उपोष्य द्वादशरात्राणि नियतो नियताशनः॥६३॥ प्रदक्षिणा कृता येन जंबूद्वीपस्य सा कृता॥ अश्वमेधमवाप्नोति सर्वकामस
मन्वितः॥६४॥ तत्रोपोष्य तु रजनीं पूतात्मा मानवो भवेत्॥ न दुर्गतिमवाप्नोति सिद्धिं प्राप्नोति चोत्तमाम्॥६५॥ अयोध्यादर्शनाद्देवि दिव्यदे

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

हमवाप्नुयात्॥अयोध्या च परब्रह्म सरयूः सगुणः पुमान्॥६६॥तन्निवासी जगन्नाथः सत्यं सत्यं वदाम्यहं॥यस्याः प्रभावमतुलं वेदा
देवाः शिवो ह्यहम्॥६७॥नहि वक्तुं समर्थोस्ति विष्णुश्च सगुणः पुमान्॥ इति श्रीरुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये द्वि-
तीयोध्यायः॥२॥ ॥पार्वत्युवाच॥देवदेव महादेव भक्तानुग्रहकारक॥ब्रूहि कांत सरय्वाश्च त्वमुत्पत्तिं मम सांप्रतं॥१॥श्रीमहादेव उवा-
च॥आदिदेवमनोः पुत्र इक्ष्वाकुर्नाम बुद्धिमान्॥वशिष्ठस्याश्रमं गत्वा प्रोवाच विनयान्वितः॥२॥इक्ष्वाकुरुवाच॥धनिकः श्रोत्रियो
राजा नदी वैद्यस्तु पंचमः॥एते यत्र न विद्यंते तत्र वासं न कारयेत्॥३॥अयोध्यानगरं रम्यं सर्वतीर्थसमन्वितं॥नदी मानय भो स्वामि-
न्सर्वपापौघनाशिनीं॥४॥इक्ष्वाकोस्तु वचः श्रुत्वा वशिष्ठो मुनिसत्तमः॥जगाम मानसं शीघ्रं नदीं मां प्रेरितो मुदा॥५॥मान-
सं सरमासाद्य तुष्टाव मधुसूदनम्॥प्रसन्नो भगवान् प्राह वरं ब्रूहि द्विजोत्तम॥६॥वशिष्ठ उवाच॥नदीं देहि महाराजन् सर्वलोके-
षु विश्रुतां॥सर्वपापहरां श्रेष्ठां ब्रह्मद्रवजलान्वितां॥७॥इति विज्ञप्तिमाकर्ण्य दत्ता वै मुंजिकेशिना॥सरयूनामतटिनी हरिनेत्रसमु-
द्भवा॥८॥वशिष्ठेन समानीता वाशिष्ठी परिकीर्तिता॥रामार्थं च समायाता रामगंगा प्रकीर्तिता॥९॥अयोध्यां प्रापयामास तां न-
दीं मानसोद्भवाम्॥सरसः संप्रभूतात्तु सरय्विति प्रथामगात्॥१०॥मन्वंतरसहस्रैस्तु काशीवासेन यत्फलम्॥तत्फलं समवा-
प्नोति सरयूदर्शने कृते॥११॥प्रयागे यो नरो गत्वा माघान्द्वादशकं वसेत्॥तत्फलं समवाप्नोति सरयूदर्शने कृते॥१२॥गयाश्राद्धं च

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

यः कुर्यात्पुरुषोत्तमदर्शनम् ॥ तत्फलादधिकं प्रोक्तं कलौ सरयूदर्शनात् ॥ १३ ॥ मथुरायां कल्पमेकं वसते मानवो यदि ॥ तत्फलं समवाप्नो
ति सरयूदर्शने कृते ॥ १४ ॥ या गतिर्योगयुक्तानां वाराणस्यां तनुत्यजां ॥ सा गतिः स्नानमात्रेण सरय्वां हरिवासरे ॥ १५ ॥ पुष्करे तु नरो गत्वा
कार्तिक्यां कृत्तिकायुते ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ १६ ॥ कोटिकल्पसहस्राणि ह्यवंतीवासजं फलम् ॥ तत्फलं समवाप्नो
ति सरयूदर्शनेन वै ॥ १७ ॥ षष्टिवर्षसहस्राणि भागीरथ्यावगाहनात् ॥ तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ १८ ॥ निमिषं निमिषार्द्धं
वा प्राणिनां रामचिंतनं ॥ यत्र कुत्र स्थितो जीवः अयोध्यां मनसा स्मरेत् ॥ १९ ॥ न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥ जलरूपेण ब्रह्मैव
सरयूर्मोक्षदा सदा ॥ २० ॥ नैवात्र कर्मणां भोगो रामरूपो भवेन्नरः ॥ पशुपक्षिमृगाश्चैव ये चान्ये पापयोनयः ॥ २१ ॥ तेपि मुक्ता दिवं यांति श्रीरा
मवचनं मम ॥ श्रीशंकर उवाच ॥ प्रथमं तत्र तीर्थं तु कथयामि वरानने ॥ २२ ॥ स्वर्गद्वारं समुत्पन्नं प्रथमं सरयूजले ॥ मुक्तिद्वारमिदं ज्ञेयं स्वर्गप्रा
प्तिकरं नृणां ॥ २३ ॥ स्वर्गद्वारस्य माहात्म्यं विस्तराद्वक्तुमीश्वरः ॥ न हि कश्चिद्दतो वच्मि संक्षेपाच्छृणु सुव्रते ॥ २४ ॥ सहस्रधारामारभ्य पूर्व
तः सरयूजले ॥ षट्त्रिंशदधिकं प्रोक्तं धनुषां षट्शतानि च ॥ २५ ॥ स्वर्गद्वारस्य विस्तारं पुराणज्ञैश्च कीर्तितम् ॥ स्वर्गद्वारसमं तीर्थं नास्ति
ब्रह्मांडगोकुले ॥ २६ ॥ स्वर्गद्वारसमं तीर्थं नास्ति ब्रह्मांडगोलके ॥ सत्यं सत्यं पुनः सत्यं न सत्यं मम भाषितम् ॥ २७ ॥ स्वर्गद्वारसमं तीर्थं ना
स्ति ब्रह्मांडगोलके ॥ दिव्यान्यपि च भौमानि तीर्थानि सकलान्यपि ॥ २८ ॥ आतरागत्य तिष्ठंति तत्र संसत्य पार्वति ॥ तस्मादत्र प्रकर्तव्यं प्र

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ० मा० तःस्नानं विशेषतः॥२९॥सर्वतीर्थावगाहस्य फलप्राप्तिमभीप्सता॥त्यजंति प्राणिनः प्राणान् स्वर्गद्वारे च ये नराः॥३०॥प्रयांति परमं स्थानं
६ विष्णोस्तेनात्र संशयः॥मुक्तिद्वारमिदं यस्मात्स्वर्गप्राप्तिकरं नृणां॥३१॥स्वर्गद्वारमिदं ख्यातं मुक्तिद्वारं तथा विदुः॥स्वर्गद्वारं सुदुःप्राप्यं दे अ० २
वैरपि न संशयः॥३२॥यद्यत्कामयते कामं तत्तत्प्राप्नोति मानवः॥स्वर्गद्वारे परा सिद्धिः स्वर्गद्वारे परा गतिः॥३३॥जप्तं दत्तं हुतं पूर्वं तपस्तप्तं कृतं
च यत्॥ध्यानमध्यापनं चैव सर्वं भवति चाक्षयम्॥३४॥जन्मांतरसहस्रेण यत्पापं पूर्वसंचितं॥स्वर्गद्वारप्रविष्टस्य तत्सर्वं व्रजति क्षयं॥
३५॥ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वै वर्णसंकराः॥कृमिम्लेच्छाश्च ये चान्ये संकीर्णाः पापयोनयः॥३६॥कीटाः पिपीलिकाश्चैव ये चान्ये
मृगपक्षिणः॥कालेन निधनं प्राप्ताः स्वर्गद्वारे शृणु प्रिये॥३७॥कौमोदकीकराः सर्वे पद्माक्षा गरुडध्वजाः॥शुभं विष्णुपरं दिव्यं प्रयांति भ
वनं हरेः॥३८॥मुनयो देवताः सिद्धाः साध्या यक्षा मरुद्गणाः॥यज्ञोपवीतमात्रेण विभागं चक्रिरे भुवः॥३९॥मध्याह्ने ह्यत्र प्रकुर्वंति सान्निध्यं दे
वतागणाः॥तस्मादत्र प्रकुर्वंति मध्याह्ने स्नानमादरात्॥४०॥सर्वेस्तेषां शुभः कालः स्वर्गद्वारे म्रियंति ये॥स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा चन्द्रह
रिं विभुं॥वपनं तत्र कुर्वंति प्रतीतन्न विचक्षणः॥अत्रागत्याथ चंद्रोपि तीर्थयात्रां चकार सः॥४२॥क्रमेण विधियुक्तेन नानाश्चर्यसमन्वितः॥
समाराध्य ततो विष्णुं तपसा दुश्चरेण वै॥४३॥तत्प्रत्यक्षं समासाद्य स्वाभिधानपुरःसरम्॥हरिं संस्थापयामास तेन चंद्रहरिः स्मृतः॥४४॥
अयोध्यायां सप्तहरयो वर्तंते पुण्यराशयः॥गुप्तहरिश्चक्रहरिस्तथा विष्णुहरिः प्रिये॥४५॥धर्महरिर्बिलहरिस्तथा पुण्यहरिः शुभः॥तस्मा ६

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

चंद्रहरेःपूजाकर्तव्याचविचक्षणैः॥तस्माच्चंद्रहरेरग्रदानंदेयंचभूरिशः॥४६॥अन्नदानंभूमिदानंगजदानंगवांतथा॥अश्वदानंरथानां
चशिबिकायापुरःसरम्॥४७॥ज्येष्ठमासिसितेपक्षेपंचदश्यांविशेषतः॥तस्यसांवत्सरीयात्रादेवैश्चंद्रहरेःस्मृता॥४८॥हरिश्चंद्रोहिराज
र्षिःसत्यधर्मपरायणः॥तेनराज्ञात्वयोध्येयंस्वर्गंनीतावरानने॥४९॥स्वर्गद्वारमितिख्यातंलोकेवेदेतथैवच॥तथारुक्मांगदेनापिस्वर्गं
नीतावरानने॥५०॥नारदस्योपदेशेनव्रतमेकादशीकृतम्॥तेनराज्ञामहादेविपौरैःसार्द्धंसभक्तिकम्॥५१॥तेनपुण्यप्रभावेनकोशला
त्रिदिवंगता॥अनेनैवयथास्वर्गंस्वर्गद्वारंतथाविदुः॥५२॥स्वर्गद्वारेनरःस्नात्वादृष्ट्वानागेश्वरंशिवं॥पूजयित्वाविधानेनसर्वान्कामानवा
प्नुयात्॥५३॥स्वर्गद्वारेनरःस्नात्वापूजयेदृषभध्वजं॥अर्द्धैवतस्ययास्यात्सासंपूर्णातस्यपूजनात्॥५४॥ऋषिदेवासुरगणैर्जपहोमपरा
यणैः॥पतिभिर्मोक्षकामैश्चस्वर्गद्वारंनिषेव्यते॥५५॥इतिश्रीरुद्रयामलेहरगौरीसंवादेअयोध्यामाहात्म्येतृतीयोऽध्यायः॥३॥श्रीशंकरउ
वाच॥तस्माच्चंद्रहरेःस्थानादग्निकोणेविराजते॥देवोधर्महरिर्नामकलिकल्मषनाशनः॥१॥पुरासमागतोधर्मस्तीर्थयात्राचिकीर्षया॥
आगत्यचचकारोच्चैर्यात्रांतत्रादरेणसः॥२॥दृष्ट्वामाहात्म्यमतुलंअयोध्यायाःसविस्मयः॥विधायस्वभुजामूर्द्ध्वंइदमाहमुदान्वितः॥३॥
अहोरम्यमिदंतीर्थंअहोमाहात्म्यमुत्तमम्॥अयोध्यासदृशीकाचित्दृश्यतेनापरापुरी॥४॥इत्युक्त्वातत्रबहुशोननर्तप्रमुदाकुलः॥तंतथा
नर्तनासक्तंधर्मंदृष्ट्वाकृपान्वितः॥५॥आविर्भूयहृषीकेशोधर्मंप्राहमहामनाः॥स्वनामपूर्विकामूर्तिर्मदीयाचेहतिष्ठतु॥६॥स्मरणादेवय

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

स्यास्तु सर्वकिल्बिषसंक्षयः॥स्थापयामास तं देवं नाम्ना धर्महरिं विभुम्॥७॥सरयूसलिले स्नात्वा शुचिस्तद्गतमानसः॥देवं धर्महरिं पश्ये
त्सर्वपापैः प्रमुच्यते॥८॥अन्नदानं तथा होमं जपो ब्राह्मणभोजनं॥प्रायश्चित्तेन विधिना पापं तस्य प्रणश्यति॥९॥आषाढे शुक्लपक्षस्य एका
दश्यां सकलो जने॥तस्य सांवत्सरी यात्रा कर्तव्या तु विधानतः॥१०॥स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा धर्महरिं विभुम्॥सर्वपापविशुद्धात्मा विष्णु
लोके वसेत्सदा॥११॥तस्मादीशानकोणे तु जानकीतीर्थमुत्तमम्॥श्रावणस्य तृतीयायां शुक्लायां च विशेषतः॥१२॥तस्य सांवत्सरी यात्रा क
र्तव्या च विचक्षणैः॥अन्नदानं तथा होमं जपो ब्राह्मणभोजनम्॥१३॥सर्वमक्षयतां याति विष्णुलोके वसेत्सदा॥तस्मादाग्नेयकोणे तु रामती
र्थं मनोहरं॥१४॥यस्य दर्शनमात्रेण नरः सिद्धिमवाप्नुयात्॥चैत्रशुक्लनवम्यां तु यात्रा तस्य प्रकीर्तिता॥१५॥मयूरी एकदा देवि आगता सरयून
दीं॥मुखे सर्पं गृहीत्वा तु प्राप्ता वै रामतीर्थके॥१६॥तन्मुखात्पतितः सर्पः सर्वेषां चैव पश्यतां॥क्षणार्द्धं पश्यमानानां दिव्यदेहो व्यजायत॥१७॥दि
व्यं विमान मारुह्य चतुर्भुजसमन्वितः॥पश्यतां सर्वजंतूनां वैकुंठपदमारुहत्॥१८॥दिवि दुंदुभयो नेदुः खात्पेतुः पुष्पवृष्टयः॥ऋषयश्च
जनाः सर्वे विस्मयं परमं ययुः॥१९॥ततो नारद आगत्य लोकानां हितकाम्यया॥रामतीर्थस्य माहात्म्यं जनेभ्यो कथयदृषिः॥२०॥कृत्वा स्नानं वि
धानेन पूजयित्वा जनार्दनं॥चतुर्भुजाश्च ते सर्वे भूत्वा जग्मुर्हरेः पदं॥२१॥इतिहासमिदं पुण्यं श्रुत्वा भक्तिसमन्वितः॥तस्य भुक्तिश्च मुक्तिश्च
पितृतृप्तिश्च जायते॥२२॥तस्मात्पश्चिमदिग्भागे भूमिर्दिव्या विराजते॥अयोध्यापीठमिति ख्यातं वसतां पापहारिणी॥२३॥नानावेषधरा देवा

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

वसंति तत्र भूरिशः ॥ तन्मध्ये च सभा दिव्या रामचंद्रस्य पार्वति ॥ २४ ॥ न कुबेरस्य शक्रस्य यमस्य वरुणस्य च ॥ यादृशी रामचंद्रस्य सभाक्का
पि न विद्यते ॥ २५ ॥ उलूकस्य च गृध्रस्य श्वानः सन्यासिनस्तथा ॥ चकार न्यायधर्मात्मा वशिष्ठाद्यैः समन्वितः ॥ २६ ॥ जन्मांतरसहस्रेण यत्पा
पं समुपार्जितं ॥ तत्सर्वं नाशमायाति सभागृहविलोकनात् ॥ २७ ॥ सा भायादक्षिणे भागे तीर्थं चापि मनोहरम् ॥ नाम्ना लोके च विख्यातं दं
तधावनकुंडकं ॥ २८ ॥ यत्र स्नानेन दानेन गर्भवासक्षयो भवेत् ॥ सर्वदा रामचंद्रस्य तत्रागत्य वराननै ॥ २९ ॥ दंतधावनकं भद्रे चकार भ्रा
तृभिः सह ॥ कौंडिन्यस्य च विप्रस्य वायुना तु मृगाजिनं ॥ ३० ॥ दंतधावनकुंडस्य जले निपतितं शुभे ॥ जलस्यास्य प्रभावेन दिव्यरू
पा बभूव ह ॥ ३१ ॥ विमानवरमारुह्य जगाम परमं पदं ॥ तस्मात्पश्चिमदिग्भागे रामदुर्गो विराजते ॥ ३२ ॥ दुर्गद्वारे हनूमांश्च वायुपुत्रस्त
तिष्ठति ॥ तथा तिष्ठतु सुग्रीवो दक्षिणे च हनूमतः ॥ ३३ ॥ सुग्रीवस्य समीपे तु अंगदोपि विराजते ॥ दुर्गस्य दक्षिणे द्वारे नलनीलौ प्रतिष्ठि
तौ ॥ ३४ ॥ सुषेणो वानरश्रेष्ठो नवरत्नस्य पूर्वतः ॥ नवरत्नादुत्तरे तु गवाक्षो नाम वानरः ॥ ३५ ॥ दुर्गस्य पश्चिमे द्वारे दधिवक्त्रस्तु तिष्ठति ॥
दुर्गेश्वरे ति नाम्नाहं तस्मिन्द्वारे व्यवस्थितः ॥ ३६ ॥ ततः शतबलिर्वीरस्तदग्रे गंधमादनः ॥ ऋषभः शरभश्चैव पनसो यं विराजते ॥ ३७ ॥
उत्तरे द्वारदेशे तु राजते वै विभीषणः ॥ विभीषणस्य महिषी शरमा नाम राक्षसी ॥ ३८ ॥ रक्षणं धर्मशीलानां भक्षणं दुष्टचेतसां ॥ करोति
शरमा नित्यं कौशल्यायां प्रहर्षिता ॥ ३९ ॥ ततो विघ्नेशको देवः पूर्वभागे च तिष्ठति ॥ यस्य दर्शनतो नृणां विघ्नलेशो न जायते ॥ ४० ॥ तस्मा

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ॰मा॰ पूर्वेदिशाभागेवीरःपिंडारकोबली॥ कोशलारक्षणेदक्षोदुष्टताडनतत्परः॥४१॥ तस्मात्पूर्वेदिशाभागेवीरस्यशुभशंसिनः॥ स्थानं
८ मत्तगजेंद्रस्यवर्ततेनियतात्मनः॥४२॥ तदग्रेसरसिस्नात्वापूजांकुर्याद्विचक्षणः॥ पूर्णवृद्धिमवाप्नोतियामवाप्यनशोचति॥४३॥ अयो अ॰१
ध्यारक्षकोवीरःसर्वकामार्थसिद्धिदः॥ नवरात्रेषुपंचम्यांयात्रासांवत्सरीभवेत्॥४४॥ मंगलेमंगलेयात्रातस्यस्यात्प्रतिमासिकी॥ त
तःपूर्वदिशाभागेद्विविदोपिविराजते॥४५॥ ईशानकोणकेमैंदोबुद्धिमानवतिष्ठति॥ ततोदक्षिणदिग्भागेजांबवानपिशोभते॥४६
तस्माद्दक्षिणतोवीरःकेसरीचापिराजते॥ दुर्गभित्तौसदाह्येतेरक्षांकुर्वंतिवानराः॥४७॥ दुर्गद्वारेहनूमंतंपूजयेद्वैविचक्षणः॥ तस्यपू
जाप्रकर्तव्यानरैर्नारीभिरेवच॥४८॥ स्थानंहनूमतश्चापिपूर्वस्यांदिशिवर्तते॥ ख्यातंहनूमतःकुंडंसर्वाभीष्टप्रदायकं॥४९॥ अंजनी
नंदनोयत्रवांछितार्थप्रदायकः॥ मंगलेमंगलेदेवियात्रास्यात्प्रतिमासिकी॥५०॥ तस्मिन्कुंडेनरःस्नात्वापूजयेत्तुवायुनंदनं॥ पूज
नात्तस्यदेवस्यकरस्थाःसर्वसिद्धयः॥५१॥ इतिश्रीरुद्रयामलेहरगौरीसंवादेअयोध्यामाहात्म्येचतुर्थोध्यायः॥ श्रीशंकरउवाच
ततःप्रविश्यदुर्गंतुपूजयेद्रत्नमंडपे॥ अयोध्यानगरेरम्येरत्नमंडपमध्यगे॥१॥ ध्यायेत्कल्पतरोर्मूलेरत्नसिंहासनेशुभे॥ महामर
कतस्वर्णाभ्यांनानारत्नैश्चमंडितं॥२॥ सिंहासनंचित्तहरंकांत्यातामिस्रनाशनं॥ तस्योपरिसमासीनंरामचंद्रंमनोहरं॥३॥ ८
ध्यायेत्कमलपत्राक्षंजानकीसहितंहरिं॥ वीरासनेसमासीनंधनुर्बाणधरंप्रभुं॥४॥ पश्चिमेलक्ष्मणंध्यायेत्धृतछत्रंमहाबलं॥

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

पार्श्वे भरतशत्रुघ्नौ वालव्यजनपाणिनौ ॥५॥ अग्रतश्च हनूमंतं बद्धांजलिपुटं मुदा ॥ सुग्रीवं जांबवंतं च स्कंदं चैव विभीषणं ॥६॥ नीलं नलं चांगदं च
ऋषभं सर्वदिक्षु च ॥ वशिष्ठं वामदेवं च जाबालिमथ काश्यपं ॥७॥ मार्कंडेयं च मौद्गल्यं तथा पर्वतनारदौ ॥ धृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं ॥
८॥ अकोपं धर्मपालं च सुमंत्रं चाष्टमंत्रिणः ॥ इंद्रादीन्लोकपालांश्च देवान्सर्वान्व्यवस्थितान् ॥९॥ एवं ध्यात्वा नरो धीमान्सीतारामं प्रपूजयेत् ॥
प्रणम्य दंडवद्भूमौ सर्वान्कामानवाप्नुयात् ॥१०॥ पुत्रार्थी पुत्रमाप्नोति धनार्थी लभते धनं ॥ मोक्षार्थी मोक्षमाप्नोति तत्किं यदिह नाप्यते ॥११॥ तस्माद्दु
त्तरदिग्भागे स्थानं चैव मनोहरं ॥ सीतायाः भवनं दिव्यं नाम्ना कनकमंडपं ॥१२॥ यत्र वै जानकी देवी सखीभिः परिवारिता ॥ रमते पतिना सार्द्धं सदैव व
रवर्णिनी ॥१३॥ पूजां तत्र विधायाथ जन्मभूमिं व्रजेन्नरः ॥ जन्मस्थानं हि रामस्य मोक्षादिफलदायकं ॥१४॥ यं दृष्ट्वा तु मनुष्यस्य गर्भवासक्षयो भ
वेत् ॥ विना दानेन तपसा विना तीर्थैर्विना मखैः ॥१५॥ नवमीदिवसे प्राप्ते व्रतधारी तु मानवः ॥ दर्शनात्तस्य भो देवि मुच्यते जन्मसंकरात् ॥१६॥ कपिलागो
सहस्रं च यो ददाति दिने दिने ॥ तत्फलं समवाप्नोति जन्मभूमेः प्रदर्शनात् ॥१७॥ जन्मांतरसहस्रेषु यत्पापं समुपार्जितम् ॥ तत्सर्वं नाशमायाति ज
न्मभूमेः प्रदर्शनात् ॥१८॥ चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः ॥ पुनर्वसृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥१९॥ तस्मिन्दिने प्रकर्तव्यं ब्रह्मप्राप्तिम
भीप्सुभिः ॥ राम एव परं ब्रह्म तद्दिनं रामतोषकं ॥२०॥ उपोषणं जागरणं तस्मात्कुर्याद्विशेषतः ॥ जन्मस्थाने नरः प्राप्य कुर्याद्रामस्य पूजनं ॥२१॥ मातु
रंकशयं राममिंद्रनीलमणिप्रभं ॥ कोमलांगं विशालाक्षं विद्युद्वर्णांबरावृतम् ॥२२॥ इति ध्यात्वा रमानाथं मंत्रेणानेन पूजयेत् ॥ श्रीरामाय नमो दे

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

षमंत्रः सर्वार्थसाधकः ॥२३॥ नरो मोक्षमवाप्नोति जन्मभूमेः प्रदर्शनात् ॥ मरुकांतारसंभूताः पंचचौराश्च पापिनः ॥२४॥ नवम्यां दर्शनाच्चैव लोकसं
तानकं गताः ॥ जन्मस्थानात्तु वायव्ये पाकस्थानं च विद्यते ॥२५॥ यस्य दर्शनमात्रेण नरः सिद्धिमवाप्नुयात् ॥ सीतायाः पाकसदनं सदा पूर्णं विराजते
२६॥ तस्य दर्शनमात्रेण करस्थाः सर्वसिद्धयः ॥ तस्मात्सर्वार्थदा देवि यात्रास्यात्सर्वकालिकी ॥२७॥ अत्र क्षत्रवधात्पापाज्जामदग्न्यो विमुक्तवान्
अत्र सूतवधात्पापाद्धलदेवो विमुक्तवान् ॥२८॥ उत्तरे जन्मभूम्यास्तु कैकेयीभवनं महत् ॥ भरतो नाम धर्मात्मा यत्र जातो रघूद्वहः ॥२९॥ दक्षिणे जन्म
भूम्यास्तु रामस्य परमात्मनः ॥ सुमित्राभवनं रम्यं दर्शनात्पापनाशनं ॥३०॥ यत्र जातौ महात्मानौ तथा शत्रुघ्नलक्ष्मणौ ॥ स्थानानां दर्शनादेव विमुच्य
ते धर्मसंकरात् ॥३१॥ जन्मस्थानात्तु भो देवि ह्यग्निकोणे विराजते ॥ सीताकूप इति ख्यातं ज्ञानकूप इति श्रुतम् ॥३२॥ जलपानं कृतं येन तस्य कूपस्य
पार्वति ॥ स ज्ञानवान्भवेल्लोके विबुधानां गुरुर्यथा ॥३३॥ जन्मस्थानादग्निकोणे तीर्थं क्षीरोदकं महत् ॥ अत्र राजा दशरथो पुत्रेष्टिं कृतवान्पुरा ॥३४॥
आश्विने शुक्लपक्षस्य एकादश्यां सुलोचने ॥ यात्रा सांवत्सरी तस्य पुत्रादिफलदायिका ॥३५॥ क्षीरोदके नरः स्नात्वा पूजयेच्च सदाशिवं ॥ सर्वा
न्कामानवाप्नोति पुत्रान्पौत्रान्विशेषतः ॥३६॥ तस्याः पूर्वदिशाभागे वर्तते तीर्थमुत्तमम् ॥ स्वर्णखनिरिति ख्यातं सर्वकामार्थसिद्धिदं ॥३७॥ यत्र च
क्रे स्वर्णवृष्टिं कुबेरो रघुजाद्भयात् ॥ कौत्साय मुनये प्रादाद्याचते गुरुदक्षिणां ॥३८॥ आशीर्वादेन तस्यैव जातं तीर्थं मनोहरं ॥ आश्विने शुक्लपक्षे तु
दशम्यां स्नानमाचरेत् ॥३९॥ अन्यदापि नरः स्नात्वा सर्वान्कामानवाप्नुयात् ॥ तस्माद्दक्षिणदिग्भागे यज्ञवेदी मनोरमा ॥४०॥ ब्राह्मणान्भोजयेत्तत्र

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

सर्वान्कामानवाप्नुयात् ॥ पश्चिमे यज्ञवेद्यास्तु अग्निकुंडं मनोरमं ॥४१॥ मार्गशीर्षस्य कृष्णायां पक्षतौ च वरानने ॥ यात्रा सांवत्सरी कार्या सर्वा
भीष्टफलप्रदा ॥४२॥ तत्र स्नात्वा च दत्वा च सर्वान्कामानवाप्नुयात् ॥ यज्ञवेद्या अग्निकोणे संगमः सिद्धसेवितः ॥४३॥ तिलोदकीसरय्वास्तु सं
गमो भुवि विश्रुतः ॥ तत्र स्नात्वा महाभागे भवंति विरुजो नराः ॥४४॥ दद्याद्दानं च विधिवन्न स भूयोभिजायते ॥ रामेण निर्मिता पूर्वं नदी सिंधु
रिवापरा ॥४५॥ सिंधुजानां तुरंगानां जलपानाय सत्वरं ॥ अमायां किल भाद्रस्य यात्रा सांवत्सरी स्मृता ॥४६॥ संगमात्पश्चिमे भागे सीताकुं
डं मनोहरं ॥ नानावृक्षैः समाकीर्णं नानापुष्पैश्च मंडितं ॥४७॥ रामस्य वरदानेन महाफलनिधीकृतं ॥ मार्गकृष्णचतुर्दश्यां तत्र स्नानं विशेषतः ॥
४८॥ सर्वपापहरं देवि सर्वदा स्नायिनां नृणां ॥ तस्मिन्तीर्थे नरः स्नात्वा दत्वा राममवाप्नुयात् ॥४९॥ रामं ससीतं संपूज्य मुक्तः स्याद्भवबंधनैः ॥ इ
ति श्रीरुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये पंचमोध्यायः ॥५॥ श्रीमहादेव उवाच ॥ सीताकुंडात्पश्चिमे तु विद्याकुंडं मनोरमं ॥ त
त्र स्नानेन दानेन नरो ज्ञानमवाप्नुयात् ॥१॥ कुंडस्य दक्षिणे कूले विद्यादेवी विराजते ॥ तस्य दर्शनमात्रेण करस्थाः सर्वसिद्धयः ॥२॥ विद्याकुंडात्प
श्चिमे तु पीठं विद्याभिधं महत् ॥ वशिष्ठाद्रामचंद्रस्य विद्याप्राप्ताश्चतुर्दश ॥३॥ सौराः शैवाश्च गाणेशा वैष्णवाः शाक्तिकास्तथा ॥ सिद्धा भ
वंति मंत्राणि जपात्तत्रैव पार्वति ॥४॥ आश्विने शुक्लपक्षे तु यात्रा तस्यानवाह्निकी ॥ विद्याकुंडात्पश्चिमे तु पर्वतो राजते प्रिये ॥५॥ जानक्यास्तु
विहारार्थं रामचंद्रस्य चाज्ञया ॥ गरुडेन समानीतः पर्वतो मणिसंज्ञकः ॥६॥ तस्य दर्शनमात्रेण करस्थाः सर्वसिद्धयः ॥ पर्वताद्दक्षिणे पार्श्वे

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ॰मा॰ गणेशं कुंडमुत्तमं॥७॥ तत्र स्नानेन दानेन वांछितं फलमाप्नुयात्॥ माघे मासि चतुर्थ्यां तु कृष्णपक्षे वरानने॥८॥ यात्रा सांवत्सरी कार्या सर्वपाप अ॰ ६
१० प्रणाशिनी॥ पर्वतादुत्तरे देवि क्षीरोदकात्तु दक्षिणे॥९॥ रुक्मिणीकुंड विख्यातं सर्वपापहरं परं॥ एकदा यादवेंद्रस्तु रुक्मिण्या सह भार्यया॥
१०॥ तीर्थयात्राप्रसंगेन अयोध्यामगमत्पुरीं॥ स्मरन् रामावतारं स्वं सुवास मधुसूदनः॥११॥ तदा तु रुक्मिणी देवी कुंडं चक्रे मनोहरं॥ ऊर्ज कृ
ष्ण नवम्यां तु यात्रा तस्य प्रकीर्तिता॥१२॥ तत्र स्नात्वा प्रदातव्यं लक्ष्मीप्रीत्यै दिशे षतः॥ सर्वान्कामानवाप्नोति इह लोके परत्र च॥१३॥ पर्वतात्प
श्चिमे भागे राज्ञो दशरथस्य हि॥ कुंडं मनोरमं भद्रे वर्तते बहुपुण्यदं॥१४॥ तिलोत्तमा नाम नदी यत्र चाति मनोरमा॥ तस्मात्पश्चिमदिग्भा
गे कौशल्याकुंडमुत्तमम्॥१५॥ तत्र स्नानेन दानेन सर्वसौख्यं प्रजायते॥ भाद्रे मासि पूर्णिमायां ह्येया यात्रा सुखप्रदा॥१६॥ सुमित्रयास्तथा
कुंडं पश्चिमे सुखदायकं॥ भरतेन कृतं कुंडं दक्षिणे पापनाशनम्॥१७॥ यात्रा तु कुंडयोः कार्या भाद्रे दर्शे शुभावहा॥ तस्मान्नैर्ऋत्यकोणे तु कुं
डं चाति मनोहरं॥१८॥ ख्यातं वृहस्पतेः कुंडं नाम्ना पापप्रणाशनं॥ तत्र स्नानेन दानेन ग्रहपीडा न जायते॥१९॥ भाद्रे शुक्ले तु पंचम्यां यात्रा तत्फ
लप्रदा॥ अन्यदा तु गुरोर्वारे स्नानं बहुफलप्रदं॥२०॥ तस्मान्नैर्ऋत्य दिग्भागे तीर्थं दुःखहं सुखप्रदं॥ महाभरमिति ख्यातं तथा दुर्भरसंज्ञकं॥२१॥
महाभरो दुर्भरश्च भ्रातरौ द्वौ समागतौ॥ सदा कमलपुष्पाणां भारेण कृतजीविकौ॥२२॥ पुष्पभारसमायुक्तौ वागतौ तत्र शोभने॥ यत्र विष्णु १०
शिवौ स्यातां मंत्रयंतौ शुभस्थले॥२३॥ तत्रैव स्थापितो भारः कमलानां शुभानने॥ तेन तुष्टौ तु तौ देवौ चतुर्वर्गं धयानसौ॥२४॥ नाम्ना तु पुण्यदौ

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

रत्र पुण्ये तीर्थे भविष्यतः ॥ नरो वा यदि वा नारी स्नानमंत्रे करिष्यतः ॥२५॥ वांछितार्थसमायुक्तौ द्वावप्यत्र भविष्यतः ॥ भाद्रे कृष्णचतु
र्दश्यां यात्रा सांवत्सरी भवेत् ॥२६॥ दुर्भरापश्चिमे भागे उर्वशीकुंडमुत्तमं ॥ यत्र स्नानेन दानेन विमुक्ता शापबंधनात् ॥२७॥ तस्मान्नैरृत्यको
णे तु शीतला वर्तते शुभे ॥ यस्या दर्शनमात्रेण विस्फोटकभयं न हि ॥२८॥ सर्वदा दर्शनं तस्याः सोमवारे विशेषतः ॥ तस्माद्दक्षिणदिग्भागे लिं
गं मंत्रेश्वरं प्रिये ॥२९॥ पूजनीयं प्रयत्नेन सर्वकामार्थसिद्धिदं ॥ तदुत्तरे सरो रम्यं तत्र स्नात्वा दिवं ब्रजेत् ॥३०॥ तदुत्तरे तु तत्रैव वंदी देवी तु वि
श्रुता ॥ यस्याः श्रवणमात्रेण निगडादि भयं न हि ॥३१॥ सर्वकामार्थसिद्ध्यर्थं यात्रा वै भौमवासरे ॥ तस्मादुत्तरदिग्भागे चुटुकीति प्रकीर्तिता
३२॥ तस्या अग्रे प्रकर्त्तव्यं दीपदानं नरैः सदा ॥ अग्रे तस्यास्तु कर्तव्यो नृभिरंगुलितो ध्वनिः ॥३३॥ चतुर्दश्यां चतुर्दश्यां तस्य यात्रा प्रकीर्ति
ता ॥ तत्पश्चिमदिशाभागे कुंडमस्ति शतक्रतोः ॥३४॥ कार्तिके मास्यमयां वै तस्या यात्रा प्रकीर्तिता ॥ तत्र स्नानेन दानेन नरः स्वर्गमवा
प्नुयात् ॥३५॥ ततः पश्चिमदिग्भागे निर्मलीकुंडमुत्तमं ॥ ब्रह्महत्याभयाद्भीतो वृत्रं हत्वा शतक्रतुः ॥३६॥ यत्रागत्य पुरा देवी वज्री निर्म
लतां गतः ॥ अन्यानि यानि पापानि ब्रह्महत्यासमानि च ॥३७॥ तानि सर्वाणि नश्यंति निर्मलीकुंडमज्जनात् ॥ कुंडस्य वार्षिकी यात्रा श्राव
णे पूर्णिमातिथौ ॥३८॥ तीर्थे तदुत्तरं श्रेष्ठं गोप्रताराभिधं महत् ॥ विष्णुस्थानं च तत्रैव नाम्ना गुप्तहरिः स्मृतः ॥३९॥ पुरा विष्णुस्तप
स्तेपे देवानां बलवृद्धये ॥ गुप्तो भूत्वा च तत्रैव तेन गुप्तहरिः स्मृतः ॥४०॥ तत्र गुप्तहरेः पूजां यः करिष्यति मानवः ॥ गमिष्यति हरेर्लो

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

केपूजयित्वाजनार्दनं ॥४१॥ देवोग्रुमहरिर्नाम सर्वकामार्थसिद्धिदः ॥ तदग्रे गोप्रतारंतु तीर्थं सर्वोत्तमोत्तमं ॥ ४२॥ गोप्रतारसमं तीर्थं न भूतं न भ
विष्यति ॥ तत्र स्नानेन दानेन न शोचति नरः क्वचित् ॥ ४३ ॥ वाराणस्यां यथा देवि वर्तते मणिकर्णिका ॥ अयोध्यायां तथा देवि गोप्रता
रं महत् ॥ ४४ ॥ यस्मिन्स्नात्वा ह्ययादेविसाकेतनगरीजनी ॥ जगाम स्वर्णमतुलं निमज्ज्य परमांभसि ॥ ४५ ॥ कार्त्तिके पूर्णिमायां
तु तत्र स्नानं समाचरेत् ॥ हरिं संपूज्य विधिवद्विधाय श्राद्धमादरात् ॥ ४६ ॥ दत्वान्नं च यथाशक्ति संतोष्य ब्राह्मणस्ततः ॥ वस्त्रा
दिभिरलंकारैः संपूज्यौ द्विजदंपती ॥ ४७ ॥ सवत्सां स्वर्णशृंगीं तु धेनुं दत्वा विधानतः ॥ नमस्कृत्य तु तत्तीर्थं शुचिस्तद्गतमानसः ॥
४८ ॥ स्वर्गद्वारे च विधिवन्मध्याह्ने स्नानमाचरेत् ॥ सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ ४९ ॥ कार्त्तिकीं प्राप्य गर्जंति तीर्था
नि सकलान्यपि ॥ गोप्रतारं गमिष्यामः पापं नश्यति तत्क्षणात् ॥ ५० ॥ गोप्रतारे नरो देवि यः स्नाति स्कविनिश्चितः ॥ स याति परमं
स्थानं योगिनामपि दुर्लभं ॥ ५१ ॥ कार्त्तिक्यां च विशेषेण स्नातव्यं विजितेंद्रियैः ॥ गोप्रतारसमं तीर्थं नास्ति ब्रह्मांडगोलके ॥ ५२ ॥
यत्र वै तीर्थराजोपि स्नातुमायाति नित्यशः ॥ कार्त्तिके यानि तीर्थानि गोप्रतारे वसंति ते ॥ ५३ ॥ इति रुद्रयामले हरगौरीसंवादे श्री
मदयोध्यामाहात्म्ये षष्ठोध्यायः ॥ ६ ॥ श्रीमहादेव उवाच ॥ गोप्रतारात्पूर्वभागे यमस्थल इतीर्यते ॥ तत्र स्नानेन दानेन यमलोकं न पश्यति
॥ १ ॥ द्वितीयायां कार्त्तिकस्य शुक्लायां तु महेश्वरि ॥ तस्य यात्रा प्रकर्तव्या नरैर्नरकभीरुभिः ॥ २ ॥ यमस्थलाद्गिकोणे योगिर

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

नीकुंडमुत्तमम्॥ यत्रासते चतुःषष्टिर्योगिन्योजलसंस्थिताः॥ ३॥ सर्वार्थसिद्धिदं नृणां स्त्रीणां चैव विशेषतः॥ स्नातव्यं च विशेषेण योगि
नीश्री नयेन्नृभिः॥ ४॥ आश्विने शुक्लपक्षे तु यात्रा तस्य नवाह्निकी॥ तस्मादीशानकोणे तु चक्रतीर्थं विराजते॥ ५॥ तत्र विष्णुहरिः साक्षा
त् द्विजेन विष्णुशर्मणा॥ अर्चा कृता महापुण्या तेन विष्णुहरिः स्मृतः॥ ६॥ कार्तिके शुक्लपक्षस्य प्रारभ्य दशमी तिथिं॥ पूर्णिमाम
वधिं कृत्वा यात्रा सांवत्सरी भवेत्॥ ७॥ चक्रतीर्थे नरः स्नात्वा दृष्ट्वा विष्णुहरिं विभुं॥ पापानि विलयं यांति नाकपृष्ठे महीयते॥ ८॥ स्व
शक्त्या तत्र दानानि दत्त्वा निःकल्मषो भवेत्॥ तस्मादीशानकोणे तु तीर्थमन्यन्महाफलं॥ ९॥ धनयक्ष इति ख्यातं सर्वकामार्थसिद्धि
दं॥ धनयक्षकुवेरस्य शापाद्दौर्गंध्यमाप्तवान्॥ १०॥ विश्वामित्रप्रसादात्तु यत्र सौगंध्यमाप्तवान्॥ सौंदर्यदं शरीरस्य परंभाग्यस्य कारणं॥ ११॥
यत्र स्नात्वा विधानेन दौर्गंध्यं त्यजति क्षणात्॥ दानं श्रद्धा स्वशक्त्या लक्ष्मीपूजा विशेषतः॥ १२॥ यत्र स्नानेन दानेन लक्ष्मीप्राप्तिर्भवेन्नृणां॥
कार्तिके कृष्णपक्षस्य चतुर्दश्यां विशेषतः॥ १३॥ तदुत्तरे वशिष्ठस्य कुंडं पापप्रणाशनं॥ यत्र वासस्त्वरुंधत्या वशिष्ठस्य महामुनेः॥ १४॥ वामदे
वस्य तत्रैव स विधिर्वर्तते नघे॥ स्नातव्यं विधिवत्तत्र स्नातव्यं च स्वशक्तितः॥ १५॥ सर्वकामफलप्राप्तिर्जायते नात्र संशयः॥ भाद्रे मासि सि
तपक्षे पंचम्यां स्नानमाचरेत्॥ १६॥ तस्माद्वायव्यकोणे तु ब्रह्मकुंडं मनोरमं॥ आगस्त्यकृतवांस्तत्र ब्रह्मा यज्ञं यथाविधि॥ १७॥ अत्र स्नानेन
दानेन पापात्मानोपि जंतवः॥ विमानहंससंयुक्तमास्थाय रुचिरावराः॥ १८॥ निवसंति ब्रह्मलोके यावदाहूतसंप्लवं ॥ ॥ अत्र स्ना

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०मा॰ नेन दानेन दिव्यदेहः प्रजायते ॥१९॥ तुलाश्वमेधयोः पुण्यं जायते नात्र संशयः ॥ ऊर्जे शुक्लचतुर्दश्यां तत्र स्नानं समाचरेत् ॥२०॥ पूर्वोत्तरदिशाभागे संस्थि-
१२ तं सरयूजले ॥ ऋणमोचनतीर्थं तु सर्वपापप्रणाशनं ॥२१॥ लोमशेनापि मुनिना यत्रागत्य वरानने ॥ ऋणत्रयाद्विमुक्तो वै यस्मिन्वै ऋणमोचने ॥२२॥ तस्माद्व-
विधानेन स्नानं दानं च शक्तितः ॥ कर्तव्यं श्रद्धया युक्तैः सर्वदा फलकांक्षिभिः ॥२३॥ ऋणमोचनतीर्थात्तु पूर्वतः सरयूजले ॥ पापमोचनसंज्ञं तु तीर्थं स-
र्वोत्तमोत्तमं ॥२४॥ पांचालदेशे संभूतो नाम्ना नरहरिर्द्विजः ॥ नानाविधानि पापानि ब्रह्महत्यादिकानि च ॥२५॥ कृतवान्यापि संगेन त्रयोमा-
र्गविनिंदकः ॥ कदाचित्साधुसंगेन तीर्थयात्राप्रसंगतः ॥२६॥ अयोध्यामागतो देवि स्नात्वा वै सरयूजले ॥ पापराशिं विनाश्यैवं निःपापं सम-
भूत्क्षणात् ॥२७॥ दिव्यं विमानमारुह्य विष्णुलोकं गतो द्विजः ॥ माघकृष्णचतुर्दश्यां तत्र स्नानं विशेषतः ॥२८॥ दानं च मनुजैः कार्यं सर्वपाप-
विशुद्धये ॥ अन्यदापि कृतस्नानं सर्वपापक्षयो भवेत् ॥२९॥ पापमोचनतीर्थं तु पूर्वतः सरयूजले ॥ सहस्रधारासंज्ञं वै सर्वकिल्बिषनाशनं ॥
३०॥ यस्मिन्रामाज्ञया वीरो लक्ष्मणः परवीरहा ॥ प्राणानुत्सृज्य योगेन ययौ शेषात्मतां पुरा ॥३१॥ एतत्क्षेत्रप्रमाणं तु धनुषां पंचविंशतिः ॥ अ-
त्र स्नानेन दानेन श्रद्धया परयान्वितः ॥३२॥ सर्वपापविशुद्धात्मा विष्णुलोकं व्रजेन्नरः ॥ अत्र स्नातो नरो धीरो लक्ष्मणं शेषरूपिणं ॥३३॥ तीर्थे
संपूज्य विधिवद्विष्णुलोकं व्रजेन्नरः ॥ तस्मादत्र प्रकर्तव्यं स्नानं दानं पुरःसरम् ॥३४॥ शेषरूपी हरिर्ध्येयः पूज्या विप्रा विशेषतः ॥ स्वर्णं चा-
न्नं च वासांसि देयानि श्रद्धयान्वितैः ॥३५॥ स्नानं दानं हरेः पूजा सर्वमक्षयतां व्रजेत् ॥ तस्मादेतन्महातीर्थं सर्वकामफलप्रदं ॥३६॥ श्रावणे

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

शुक्लपक्षस्य या तिथि तिः पंचमी भवेत्॥ तस्यामत्र प्रकर्तव्यो नागानुद्दिश्य यत्नतः॥३७॥ उत्सवो विपुलः सद्भिः शेषपूजापुरःसरः॥ संतुष्टाः फणि(
नः सर्वे पीडयंति न मानुषं॥३८॥ वैशाखमासि ये स्नानं कुर्वंत्यत्र समाहिताः॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि॥३९॥ विष्णुमुद्दिश्य यो दद्यात्
सालंकारां पयस्विनीं॥ सवत्सामत्र संतीर्थे सत्पात्राय द्विजन्मने॥४०॥ तस्य वासो भवेन्नित्यं विष्णुलोके सनातने॥ अक्षयं स्वर्गमाप्नोति तीर्थस्नाने
न मानवः॥४१॥ वैशाखमासि तीर्थानि पृथिवीसंस्थितानि वै॥ तानि तत्रैव तिष्ठंति सत्यं सत्यं च पार्वति॥४२॥ तस्मादत्र विधानेन वैशाखस्नानतो नृ
णां॥ सर्वतीर्थावगाहस्य भवति फलं महत्॥४३॥ इति श्रीरुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये सप्तमोध्यायः॥७॥ पार्वत्युवाच॥
अयोध्यायाः परिसरे तीर्थानि यानि संति च॥ ब्रूहि तानि महादेव यद्यहं तव वल्लभा॥१॥ श्रीमहादेव उवाच॥ दक्षिणे च तिलोदक्याः पामाकुंडं तु
विद्यते॥ तत्र स्नात्वा रवेर्वारे पामारोगो न जायते॥२॥ तस्माद्दक्षिणदिग्भागे वैतरणी विराजते॥ वैतरण्यां कृतं स्नानं यमलोकं न पश्यति॥३॥ भाद्रे मा
सि पूर्णिमायां यात्रा सांवत्सरी भवेत्॥ घोषार्कतीर्थमपरं वैतरण्यास्तु दक्षिणे॥४॥ सूर्यकुंडमिति ख्यातं सर्वकामार्थदायकं॥ व्रणी कुष्ठी दरिद्री वा
दुःखाक्रांतोपि यो नरः॥५॥ करोति विधिवत्स्नानं सूर्यलोकाभिकांक्षया॥ रविवारे विशेषेण कर्तव्यं स्नानमादरात्॥६॥ भाद्रे मासि तथा माघे शुक्ल
पक्षाप्र यत्नतः॥ कर्तव्यं विधिवत्स्नानं सर्वरोगैः प्रमुच्यते॥७॥ पौषे मासि तथा स्नानं सूर्यवारे विशेषतः॥ सप्तम्यां रवियुक्तायां स्नानं बहुफलप्रदं
॥८॥ सूर्यकुंडात्तु भो देवि पश्चिमे दिग्दले स्थितं॥ रविकुंडमिति ख्यातं सर्वपापहरं सदा॥९॥ यत्र स्नानेन दानेन वरां कांतिमवाप्नुयात्॥ दुर्गा चाष्टभुजी(

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ॰मा॰ तत्र पूजनीया प्रयत्नतः॥ तत्पश्चिमदिशाभागे कुक्कमायुधकुंडकं॥ कुंडद्वये नरैः स्नानं कर्तव्यं स्त्रीभिरेव च॥११॥ दानं देयं यथाशक्त्या रतिकं
१३ दर्पतुष्टये॥ भवेतां नियतं तस्य संतुष्टौ रतिमन्मथौ॥१२॥ माघे विशुद्धपंचम्यां तयोर्यात्रा प्रकीर्तिता॥ सूर्यकुंडात्पूर्वभागे त्रिपुरारिरहं प्रिये
१३॥ सरयूसलिले स्नात्वा कृत्वा संध्याजपादिकं॥ पूजयेत्त्रिपुरारिं च कार्तिके पूर्णिमातिथौ॥१४॥ सर्वान्कामानवाप्नोति त्रिपुरारेः प्रसादतः॥
तस्मात्पूर्वदिशाभागे नाम्ना बिल्वहरिः स्मृतः॥१५॥ यं दृष्ट्वा मानवो लोके सर्वपापातिगो भवेत्॥ तत्र स्नानेन दानेन परां गतिमवाप्नुयात्॥१६॥ अ
मायां माघे मासि स्नात्वा मोक्षमवाप्नुयात्॥ तस्मात्पूर्वदिशाभागे वल्मीकं तीर्थमुत्तमं॥१७॥ किरातो डिंडिरो यत्र तपस्तेपे सुदारुणं॥ श्रीरामद
र्शनं कृत्वा जगाम परमं पदं॥१८॥ तत्र स्नात्वा नरो याति वैष्णवं पदमुत्तमं॥ तस्मात्पूर्वदिशाभागे स्थानं वैलोकयावनं॥१९॥ यत्र शृंगी ऋषिर्नाम्ना
शांतया सह भार्यया॥ तपः करोति धर्मात्मा लोकानां स्वस्वहेतवे॥२०॥ कार्तिक्यां तु विशेषेण यात्रा तस्य तु वार्षिकी॥ तस्मान्नैर्ऋत्यकोणे तु नाम्ना
पुण्यहरिः स्मृतः॥२१॥ रविवारे विशेषेण यात्रा तस्य विधीयते॥ स्नात्वा दत्वा च विधिवत्सर्वरोगैः प्रमुच्यते॥२२॥ तस्मान्नैर्ऋत्यकोणे तु तीर्थं सर्वो
त्तमोत्तमं॥ पिशाचमोचनं नाम विद्यते च फलप्रदं॥२३॥ तत्र स्नात्वा च दत्वा च पिशाचो नैव जायते॥ मार्गशुक्लचतुर्दश्यां यात्रा सांवत्सरी भवेत्॥
२४॥ श्राद्धे कृते तदा देवि पिशाचो नैव जायते॥ तस्मात्पश्चिमदिग्भागे रम्यं भरतकुंडकं॥२५॥ तत्र कुंडे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ तत्र स्नानं त
था दानं सर्वमक्षयतां व्रजेत्॥२६॥ अन्नं बहुधनं देयं वासांसि विविधानि च॥ तत्र स्नात्वा तथा श्राद्धं पितॄनुद्दिश्य कुर्वतः॥२७॥ पितरस्तस्य तुष्टा

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

स्तुतुष्टाः स्युः सर्वदेवताः ॥२७॥ चैत्रकृष्णचतुर्दश्यां यात्रा सांवत्सरी भवेत् ॥ तस्मादुत्तरदिग्भागे नंदिग्रामो वरानने ॥२८॥ नंदिग्रामेवसत्पूर्वं
भरतो रघुवंशजः ॥ रामचंद्रं हृदि ध्यायन् निर्मलात्मा जितेंद्रियः ॥२९॥ तत्र स्थिताः प्रजाः सर्वा ररक्ष क्षितिमंडलं ॥ मन्वंतरसहस्रैस्तु काशीवासेन
यत्फलम् ॥३०॥ तत्फलं समवाप्नोति नंदिग्रामस्य दर्शनात् ॥ कुंडस्य पश्चिमे देवी कालिका नाम राजते ॥३१॥ तस्याः पूजनमात्रेण सर्वसिद्धिः प्र
जायते ॥ तस्याः पश्चिमतो देवि जटाकुंडमनुत्तमं ॥३२॥ यत्र रामादिभिः सर्वैः जटापरित्यक्ता निजाः ॥ तत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात्
॥३३॥ जटाकुंडे तु संपूज्यौ ससीतौ रामलक्ष्मणौ ॥ चैत्रकृष्णचतुर्दश्यां तस्य यात्रा प्रकीर्तिता ॥३४॥ कुंडात्तु भरतस्यैव कूले दक्षिणके तथा ॥ गयाकू
पमिति ख्यातं सर्वाभीष्टफलप्रदम् ॥३५॥ नरकस्थाश्च ये केचित् पितरश्च पितामहाः ॥ विष्णुलोकं तु गच्छंति तस्मिन् श्राद्धे कृते प्रिये ॥३६॥ तस्मि
न् श्राद्धे कृते देवि पितॄणामनृणी भवेत् ॥ सक्तुभिः पिंडदानं च संयावैः पायसेन च ॥३७॥ कर्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडेन वा ॥ श्राद्धं विधान
तः कृत्वा पितॄणां तृप्तिहेतवे ॥३८॥ पितृसंतोषदं नित्यं तत्र दत्ताक्षयं भवेत् ॥ तस्याद्दक्षिणदिग्भागे शोभते तमसा नदी ॥३९॥ यत्र स्नानं तथा दा
नं सर्वपापहरं सदा ॥ स्थानानि तु मुनीनां च यस्यास्तीरे महात्मनां ॥४०॥ मांडव्यस्य मुनेः स्थानं वर्तते पापनाशनं ॥ तद्वनं पुण्यमधिकं नानावृक्षमयो
भवत् ॥४१॥ नाम्ना प्रमोदकं लोके पावनं परमुत्तमं ॥ यस्य दर्शनतो नृणां सर्वपापक्षयो भवत् ॥४२॥ तमसा दक्षिणे भागे सीताकुंडं मनोहरं ॥ तत्रैव
रामकुंडं च दर्शनात्पापनाशनं ॥४३॥ ज्येष्ठमासि चतुर्दश्यां यात्रा सांवत्सरी भवेत् ॥ सीताकुंडे नरः स्नात्वा दृष्ट्वा दुग्धेश्वरं शिवं ॥४४॥ सर्वपापैर्वि

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

अ०म मुच्येत नात्र कार्या विचक्षणा ॥ ब्राह्मणः श्रुतिसंपन्नो ब्रह्मदत्तो महामतिः ॥४५॥ यत्र स्नात्वा जगाम शक्रवैष्णवं पदमुत्तमं ॥ तस्माद्दक्षिणदिग्भागे
१४ भैरवो नाम नामतः ॥४६॥ दृष्ट्वा तु सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ रक्षितो वास्तुदेवेन क्षेत्ररक्षार्थमादरात् ॥४७॥ मार्गशीर्षस्य कृष्णायामष्टम्यां
तस्य निर्मिता ॥ यात्रा सांवत्सरी तत्र सर्वकामार्थसिद्धिदा ॥४८॥ तस्मात्पूर्वदिशाभागे सुग्रीवं कुंडमुत्तमम् ॥ तस्मात्पूर्वदिशाभागे हनुमत्कुंडमि
त्यपि ॥४९॥ तस्य पश्चिमदिग्भागे विभीषणसरः शुभं ॥ तेषु स्नानेन दानेन रामस्य पूजनेन च ॥५०॥ सर्वान्कामानवाप्नोति तेष्वेव हि विधा
नतः ॥ चैत्रशुक्लनवम्यां तु तेषां यात्रा प्रकीर्तिता ॥५१॥ इति श्रीरुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये ऽष्टमोध्यायः ॥८॥ श्रीम
हादेव उवाच ॥ तमसायास्तटे देवि स्थानं वै गौतमस्य तु ॥ यस्य दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥१॥ तत्पश्चिमदिशाभागे च्यवनस्थानमुत्
तमं ॥ यं दृष्ट्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥२॥ आस्तीकस्य मुनेः स्थानं नैरृत्ये च विराजते ॥ तस्य दर्शनमात्रेण सर्पभीतिर्न जायते ॥३॥ त
दुत्तरे महादिव्यं नाम्ना र[illegible]कस्थलं ॥ तस्मात्पश्चिमदिग्भागे सरयू तीर्थमुत्तमं ॥४॥ घृताचीकुंड विख्यातं घृताची यत्र चाप्सरा ॥ विमुक्ता
शापदोषेण तत्र स्नात्वा पुराप्रिये ॥५॥ तस्मिन्तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ सौंदर्यं परमं तस्य भवेत्तत्र न संशयः ॥६॥ पौषशुक्लचतुर्द
श्यां तत्र स्नानं समाचरेत् ॥ तस्मात्पश्चिमदिग्भागे संगमः पापनाशनः ॥७॥ सरयूघर्घरयोः पुण्ये तत्र स्नात्वा दिवं व्रजेत् ॥ पुरा कृतयुगे देवी पृ
थिव्युद्धरणं कृतं ॥८॥ तत्र निष्पादितं तीर्थं वाराहेण महात्मना ॥ हत्वा दुष्टं हिरण्याक्षं पृथिवीस्थापनं कृतं ॥९॥ अत्र देवाः सगंधर्वाः हर्षनिर्भर

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

मानसाः॥ समागत्य स्तुतिं चक्रुर्यज्ञवाराहतुष्टये॥१०॥ अंतरिक्षे सुभांकृत्वा निवसंति सदा सुराः॥ कुरुक्षेत्रे महाक्षेत्रे राहुग्रस्ते दिवाकरे॥११॥ यत्फलं
स्नानदानाभ्यां संगमे तत्समं भवेत्॥ अमायां पौर्णमास्यां च ह्युदृश्ययोरुभयोरपि॥१२॥ ग्रहणे च व्यतीपाते स्नानं वैष्णवलोकदं॥ दशकोटिसहस्रा
णि दशकोटिशतानि च॥१३॥ सरयूघर्घरयोः संगे तीर्थानि निवसंति च॥ देवतानां च सिद्धानां मुनीनां योगिनां तथा॥१४॥ ब्रह्मविष्णुशिवानां च
सांनिध्यं संगमे शुभे॥ पौषे मासि विशेषेण स्नानं बहुफलप्रदं॥१५॥ पौषे मासि तु यो दद्यात् घृतसंदीपमुत्तमं॥ स याति ब्रह्मणः स्थानं पुनरावृ
त्तिवर्जितं॥१६॥ यस्तु शुक्लचतुर्दश्यां पौषस्य संयतो व्रती॥ जागरं कुरुते धीरः स गच्छेत् भवनं हरेः॥१७॥ ततः प्रभाते विमले स्नात्वा विधिवद्दाद्
रान्॥ गां चैवान्नं च वासांसि तुरंगं गजमुत्तमं॥१८॥ संगमे विधिवद्दत्त्वा स याति परमां गतिं॥ अथातः श्रूयतां भद्रे सरय्वा उत्तरे तटे॥१९॥ संगमं कुटि
लानद्याः सरय्वाश्च विराजते॥ तत्र स्नात्वा च दत्त्वा च सर्वपापैः प्रमुच्यते॥२०॥ अष्टावक्रस्य शापेन कुब्जा जातास्तु कन्यकाः॥ मांधातुनामराजर्षेः श
तानि च चतुर्दश॥२१॥ तत्र स्नात्वा च दत्त्वा च विमुक्ताः शापदोषतः॥ सकंदर्पास्ता भवन् क्षिप्रं राजकन्यास्तु पार्वति॥२२॥ चैत्रे मासि सिते पक्षे नवम्यां
रामजन्मनि॥ तत्र स्नात्वा च दत्त्वा च प्रयांति भवनं हरेः॥२३॥ संगमात्कुटिलानद्याः ईशाने क्षेत्रमुत्तमं॥ मखस्थानं महापुण्यं यत्र पुण्या मनोरमा॥
२४॥ नदी वहति पापघ्नी भुक्तिमुक्तिप्रदायनी॥ चैत्रस्य पूर्णिमायां तु यात्रा सांवत्सरी स्मृता॥२५॥ यत्र राजा दशरथो हयमेधं चकार वै॥ तेन पुण्य
प्रभावेण जाता रामादयः सुराः॥२६॥ बहवो भोजिता विप्रा गावो दत्ता विधानतः॥ जन्मांतरसहस्राग्रं यत्किंचिद्दुष्कृतं कृतं॥२७॥ तत्सर्वं विलयं या

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

यातिस्नानदानैर्न संशयः॥ ततोग्निकोणतो देवि रामरेखा नदी शुभा॥२८॥ कृता सा रामचंद्रेण धनुःकोट्या तु या पुरा॥ जन्मपानाय धेनूनां सर्वपा
पविनाशिनी॥२९॥ ये द्रक्ष्यंति सदा भक्त्या रामरेखां समागतां॥ ते प्राप्स्यंति धनं धान्यं आयुरारोग्यमेव च॥३०॥ चैत्रे मासि त्रयोदश्यां शुक्लायां तु वि
शेषतः॥ यात्रा सांवत्सरी कार्या भुक्तिमुक्तिप्रदायिका॥३१॥ इति ते कीर्तिता यात्रा संक्षेपेण वरानने॥ अयोध्यां पुनरागत्य स्वर्गद्वारे वसेद्दिमां॥३२॥
दुर्लभा सर्वजंतूनां तीर्थयात्रा सदा प्रिये॥ तीर्थयात्राप्रभावेण स्वर्गं याति नरोत्तमः॥३३॥ इति श्रीरुद्रयामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये
नवमोध्यायः॥९॥ श्रीमहादेव उवाच॥ अयोध्या कलिकाले तु प्रातरुत्थाय कीर्तयेत्॥ तेन पुण्यप्रभावेन स्वर्गं याति न संशयः॥१॥ वासरः को वि
ना सूर्यं विना सोमेन का निशा॥ तद्वद्भाति स कल्मे अयोध्यां नागतो यदि॥२॥ यत्किंचित् क्रियते तीर्थे स्नानं देवार्चनं तथा॥ दक्षिणादानतः सि
द्धिं सकलं सफलं व्रजेत्॥३॥ इमां यः कुरुते यात्रां सर्वपापहरां प्रिये॥ नमस्य पुनरावृत्तिः कल्पकोटिशतैरपि॥४॥ अयोध्या परमं स्थानमयो
ध्या परमं महत्॥ अयोध्यायाः समा काचित्पुरी नैव प्रदृश्यते॥५॥ अपरं शृणु भो देवि मर्त्ये मुक्तिप्रदायकं॥ शोणः सिंधुर्हिरण्याक्षः कोकलोहि
तघर्घराः॥६॥ शतलज्जो नदाः सप्त पावनो ब्रह्मसूनवः॥ शालिग्रामो महायोगः शंभलग्राम एव च॥७॥ नंदिग्रामस्त्वयोध्यायां त्रयो ग्रामाश्च मुक्ति
दाः॥ अयोध्या मथुरा माया काशी कांची त्ववंतिका॥८॥ द्वारावती तथा ज्ञेया सप्त पुर्यश्च मुक्तिदाः॥ दंडकं सैंधवारण्यं जंबूमार्गश्च पुष्करम्॥९॥ उत्पलाव
र्तमारण्यं नैमिषं कुरुजांगलं॥ हिमवानर्बुदश्चैव नवारण्याश्च मुक्तिदाः॥१०॥ रेणुका शूकरः काशी काली कालवटेश्वरः॥ कालंजरो महाकालऊ

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

...रानवमुक्तिदाः ॥११॥ कोकाकुब्जार्बुदश्चैव मणिकर्णी वटस्तथा ॥ शालग्रामः शूकरश्च मथुरा च हरेः प्रिया ॥१२॥ गयानिःक्रमणश्चैव मश्च लोहार्गल
स्तथा ॥ स्वयंप्रभा मालवश्च बदरी च हरेर्गृहं ॥१३॥ गुह्यान्येतानि दिव्यानि मुक्तिद्वारं चतुर्दश ॥ सप्तपुर्यस्त्वयोध्याद्या मानवारण्यानवोखराः ॥१४॥ चतुर्दशैव
गुह्यानि मुक्तिद्वाराणि भूतले ॥ गंगास्नानं सतां संगो दानं च हरिपूजनं ॥१५॥ आतिथ्यं च पुराणानां श्रवणं मुक्तिसाधनं ॥ वदंति मुनयः सर्वे साधूनां संग
मं वरं ॥१६॥ यतो ज्ञानं हरेर्भक्तिः पापहानिश्च जायते ॥ एतेषां दर्शनेनैव यत्फलं जायते नृणां ॥१७॥ तत्फलं समवाप्नोति अयोध्यादर्शने कृते ॥ एतत्ते कथि
तं देवि मया पृष्टं हि यत्त्वया ॥१८॥ इदं माहात्म्यमतुलं यः पठेत्प्रयतो नरः ॥ शृणुयात् श्रावयेद्वापि स याति परमां गतिं ॥१९॥ तस्मादेतत्प्रयत्नेन श्रोतव्यं नन
रैः सदा ॥ द्विजपूजा विष्णुपूजा विधातव्या प्रयत्नतः ॥२०॥ दातव्यानि सुवर्णानि यथाशक्त्या द्विजन्मने ॥ गोवाचकाय प्रददाति वित्तं श्रद्धायुतान्नं च य
थाशक्त्या ॥२१॥ गाश्चैव वस्त्राभरणानि रौप्यं मुक्तां सुवर्णीं सस्करवीधनाढ्यः ॥ यत्किंचित् क्रियते कर्म स्नानं देवार्चनं तथा ॥२२॥ दक्षिणादानतः सि
द्धं सकलं सफलं व्रजेत् ॥ वाचके परितुष्टे च सकलाः सफलाः क्रियाः ॥२३॥ सर्वान्कामानवाप्नोति देवलोके च मोदते ॥२४॥ मतिविपुलनिदानैर्वर्णितं ध
र्मसारं कलयति परभक्त्या क्षेत्रमाहात्म्यमेतत् ॥ य इह नरउदारः श्रीशनाथः स सम्यक् व्रजति हरिनिवासं सर्वभोगांश्च भुक्त्वा ॥२५॥ इति श्रीरुद्र
यामले हरगौरीसंवादे श्रीमदयोध्यामाहात्म्ये दशमोऽध्यायः ॥१०॥ समाप्तं शुभमस्तु ॥ काश्यां त्रिपुरभैरवीसन्निधौ श्री २ सुतवाबू फतहनारा
यणसिंहजीत्यभिधायुजो निकेतने वाराणसीप्रसादस्य काशीसंस्कृतमुद्रायन्त्रेऽङ्कितम् संवत् १९२५ वैशाख वदी २ गुरुवार शुभं भवतु

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri

॥ इति श्रीअयोध्यामाहात्म्यं समाप्तम् ॥

CC-0.Courtesy Shri K.S.Parihar and Dwivedi Ji District Library Varanasi. Digitized by eGangotri